श्रीमते रामानुजाय नमः

# प्रतिवादि भयङ्करम् अण्णन् अरुळिच् चेय्द
# ॥ वरवरमुनि मङ्गलम् ॥

श्रीमते रंयजामात्रुमुनीन्द्राय महात्मने ।
श्रीरङ्गवासिने भूयात् नित्यश्रीर् नित्यमङ्गलम् ॥ 1

श्रीरङ्गादिस्थलेशानां मङ्गलाशासनं शुभम् ।
कुर्वते सौम्यजामात्रुमुनये नित्यमङ्गलम् ॥ 2

श्रीरामानुजयोगीन्द्रदर्शनाब्धि सुधाम्शवे ।
सौम्यजामात्रुमुनये सर्वज्ञायास्तु मङ्गलम् ॥ 3

श्रीपदेश्चरणांभोजप्रेमांरुतमहाब्धये ।
सौम्यजामात्रुमुनये सत्त्वोद्रिक्ताय मङ्गलम् ॥ 4

श्रीरामानुजभाष्यार्थव्याख्यानासक्तचेतसे ।
सौम्यजामात्रुमुनये सदाभोग्याय मङ्गलम् ॥ 5

श्रीमच्छठारिसूक्तीनां व्याख्यावैदग्ध्यशालिने ।
सौम्यजामात्रुमुनये सदाश्लिष्टाय मङ्गलम् ॥ 6

श्रीरामानुजपादाब्जप्राप्यप्रापकभावताम् ।
प्राप्ताय सौम्यजामात्रुमुनये नित्यमङ्गलम् ॥ 7

अष्टाक्षरब्रह्मविद्यानिष्ठायामिततेजसे ।
सौम्यजामात्रुमुनये सौरिहृद्याय मङ्गलम् ॥ 8

सदाद्वयानुसन्धान साक्षात्कृतमधुद्विषे ।
सौम्यजामात्रुमुनये शान्तिभूषाय मङ्गलम् ॥ 9

प्रपन्नजनसन्दोहमन्दाराय महात्मने ।
सौम्यजामात्रुमुनये सात्त्विकेन्द्राय मङ्गलम् ॥ 10

तुलामासे–वतीर्णाय भोगिराजांशतश् शुभे ।
मूलर्क्षे सौम्यजामात्रुमुनये नित्यमङ्गलम् ॥ 11

श्रीशैलेशगुरोर् दिव्यश्रीपादाम्बुरुहालये ।

सौम्यजामातृमुनये सर्वदा नित्यमङ्गलम् ॥ 12

**॥ इति वरवरमुनि मङ्गलम् ॥**